# Manamala by Achyuta Krishnananda Tirtha

# અચ્યુતકૃષ્ણાનન્દતીર્થકૃતા માનમાલા

## Document Information

Text title : Manamala by Achyutakrishnanandatirtha

File name : mAnamAlAAnandatIrtha.itx

Category : major_works, vedAnta, yoga

Location : doc_z_misc_major_works

Transliterated by : Harihara advaitapurna at gmail.com

Proofread by : Harihara advaitapurna at gmail.com

Latest update : September 14, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# અચ્યુતકૃષ્ણાનન્દતીર્થકૃતા માનમાલા

ઓતપ્રોતમિદં સર્વં યસ્મિન્ સચ્ચિત્સુખાત્મકે ।
પર્યવસ્યન્તિ વેદાન્તા યત્ર ચાહં તદક્ષરમ્ ॥ ૧॥

શઙ્કરં શઙ્કરાચાર્યં કેશવં બાદરાયણમ્ ।
સૂત્રભાષ્યકૃતૌ વન્દે ભગવન્તૌ પુનઃ પુનઃ ॥ ૨॥

શ્રીમત્સ્વયમ્પ્રકાશેન્દ્રાન્ પ્રણિપત્ય જગદ્ગુરૂન્ ।
બાલાનાં સુખબોધાય માનમાલા વિરચ્યતે ॥ ૩॥

પ્રમાતા ચ પ્રમેયં ચ પ્રમા ચૈવ પ્રમાણકમ્ ।
પદાર્થાસ્ત્વિહ સર્વજ્ઞૈશ્ચત્વાર ઇતિ કીર્તિતાઃ ॥ ૪॥

પ્રમાતાહં પ્રમેયં ચ પઞ્ચ શબ્દાદિકં કિલ ।
શબ્દસ્પર્શરૂપરસગન્ધાઃ શબ્દાદયઃ સ્મૃતાઃ ॥ ૫॥

તત્તદ્વિષયકજ્ઞાનં દ્વિવિધં પરિકીર્તિતમ્ ।
સંસ્કારમાત્રજન્યં યજ્જ્ઞાનં સ્મરણમુચ્યતે ॥ ૬॥

અનુભૂતિસ્તુ તદ્ભિન્નજ્ઞાનં સા ચ દ્વિધા સ્થિતા ।
યથાર્થા ચાયથાર્થેતિ તત્રાદ્યા તુ પ્રમા કિલ ॥ ૭॥

અબાધિતાર્થકજ્ઞાનં યથાર્થાનુભવો મતઃ ।
પ્રમાયાઃ કરણં યત્તત્પ્રમાણમિતિ ગીયતે ॥ ૮॥

પ્રત્યક્ષમનુમાનં ચોપમાનં શબ્દ ઇત્યપિ ।
ચત્વાર્યેવ પ્રમાણાનીત્યાહુઃ કેચન તાર્કિકાઃ ॥ ૯॥

અર્થાપત્તિં તથા માનં વદન્ત્યનુપલબ્ધિકમ્ ।
પ્રત્યેકં લક્ષણાન્યાહુઃ સઙ્ગ્રહેણેહ કથ્યતે ॥ ૧૦॥

સાક્ષાત્કરોમ્યહં શબ્દં શ્રોત્રેણેતિ વિભાવ્યતે ।
પ્રત્યક્ષપ્રમિતિઃ સા તુ શ્રોત્રં તત્કરણં મતમ્ ॥ ૧૧॥

તથૈવાનુમિનોમીતિ જ્ઞાનં યદનુભૂયતે ।
વહ્ન્યાદિકં સાનુમિતિસ્તસ્યાઃ કરણમુચ્યતે ॥ ૧૨॥

વ્યાપ્યવાનયમિત્યેવં પરામર્શો હિ જાયતે ।
ગૃહીતવ્યાપ્તિકસ્યાતોઽનુમિતિઃ કિલ જાયતે ॥ ૧૩॥

તસ્માલ્લિઙ્ગપરામર્શો હ્યનુમાનમિતિ સ્થિતમ્ ।
અવિનાભાવસમ્બન્ધો વ્યાપ્તિરિત્યવધાર્યતે ॥ ૧૪॥

ધૂમે વહ્ન્યવિનાભાવસમ્બન્ધો હ્યવધાર્યતે ।
વ્યભિચારાભાવદૃષ્ટેઃ સહચારસ્ય દર્શનાત્ ॥ ૧૫॥

અન્વયવ્યતિરેકાભ્યાં સહચારો દ્વિધા મતઃ ।
યત્ર ધૂમસ્તત્ર વહ્નિરસ્તિ યદ્વન્મહાનસે ॥ ૧૬॥

વહ્નિર્ન વિદ્યતે યત્ર ધૂમસ્તત્ર ન વિદ્યતે ।
યથા હ્રદે પર્વતાદૌ ન તથા ધૂમદર્શનાત્ ॥ ૧૭॥

વ્યતિરેકમુખેનાપિ સાધ્યતે હિ શિખી બુધૈઃ ।
અન્વયવ્યતિરેકાખ્યમનુમાનમુદાહૃતમ્ ॥ ૧૮॥

પર્વતો વહ્નિમાન્ ધૂમાદ્યથા દૃષ્ટો મહાનસઃ ।
તથાયં પર્વતસ્તસ્માદ્વહ્નિમાનેવ ગમ્યતે ॥ ૧૯॥

અન્વયવ્યાપ્તિમલ્લિઙ્ગં વ્યતિરેકિ ચ કેવલમ્ ।
યથાદૃષ્ટં તથા તેન લિઙ્ગેનાનુમિતિર્ભવેત્ ॥ ૨૦॥

હેતોસ્તુ લક્ષણં વ્યાપ્તિર્યસ્તદ્વાનવભાસતે ।
હેતુઃ સન્ વ્યાપ્તિરહિતો હેત્વાભાસ ઉદાહૃતઃ ॥ ૨૧॥

અનુમાનમિદં પ્રોક્તમુપમાનમથોચ્યતે ।
સાદૃશ્યદર્શનાજ્જાતં જ્ઞાનં સોપમિતિર્ભવેત્ ॥ ૨૨॥

ઉપમાનં તુ સાદૃશ્યજ્ઞાનં તત્કરણં મતમ્ ।
ગોસાદૃશ્યધિયા યદ્વદ્ગવયાદિવિનિશ્ચયઃ ॥ ૨૩॥

આકાઙ્ક્ષાયોગ્યતાસત્તિમત્પદાનાં કદમ્બકમ્ ।
વાક્યં શબ્દપ્રમાણં સ્યાચ્છક્તં પદમિતીર્યતે ॥ ૨૪॥

શક્તિઃ સઙ્કેત ઇત્યેકે પદાર્થાન્તરમિત્યપિ ।
ગૃહીતશક્તેસ્તાત્પર્યગ્રહાદ્વાક્યાર્થધીર્ભવેત્ ॥ ૨૫॥

સંસર્ગો વા વિશિષ્ટો વા વાક્યાર્થઃ સમુદાહૃતઃ ।
ગામાનયેત્યાદિ વાક્યં સમ્બન્ધાર્થસ્ય બોધકમ્ ॥ ૨૬॥

નીલમુત્પલમિત્યાદિ વિશિષ્ટાર્થસ્ય બોધકમ્ ।
ઇત્યાદિ લૌકિકં વાક્યમાપ્તોક્તં માનમિષ્યતે ॥ ૨૭॥

જ્યોતિષ્ટોમેન યાગેન સ્વર્ગકામો યજેત હિ ।
ઇત્યાદિ વૈદિકં વાક્યં વિદુષાં સ્વાર્થબોધકમ્ ॥ ૨૮॥

યાગસ્તુ કરણં તત્ર ફલં સ્વર્ગઃ પ્રતીયતે ।
સાધ્યસાધનસમ્બન્ધો વાક્યાર્થસ્તુ પ્રતીયતે ॥ ૨૯॥

પ્રવર્તકત્વં વાક્યસ્ય પ્રાહુર્મીમાંસકાઃ કિલ ।
બોધકત્વં પ્રમાણત્વાત્કેવલં વાદિનઃ પરે ॥ ૩૦॥

ઈષ્ટસાધનતાજ્ઞાનાત્કૃતિસાધ્યતયા પુમાન્ ।
પ્રવર્તતે સ્વયં તસ્માદ્વાક્યં નૈવ પ્રવર્તકમ્ ॥ ૩૧॥

સપ્તદ્વીપવતી પૃથ્વી પુત્રસ્તે જાત ઇત્યપિ ।
વાક્યાદ્વાક્યાર્થબોધસ્તુ જાયતે હિ વિના કૃતિમ્ ॥ ૩૨॥

પ્રવર્તકત્વં વાક્યસ્ય નેતિ તસ્માદ્વિનિશ્ચિતમ્ ।
શક્ત્યા લક્ષણયા વાપિ વાક્યં સ્વાર્થં પ્રબોધયેત્ ॥ ૩૩॥

અન્વયાનુપપત્તૌ તુ મુખ્યાર્થસ્ય પરિગ્રહે ।
મુખ્યાર્થસમ્બન્ધિન્યર્થે પ્રતીતિર્લક્ષણા મતા ॥ ૩૪॥

તાત્પર્યાનુપપત્તિર્વા લક્ષણાબીજમુચ્યતે ।
વિષં ભુઙ્ક્ષ્વેત્યાદિ વાક્યં તન્નિવૃત્તિં હિ બોધયેત્ ॥ ૩૫॥

લક્ષણા ચ ત્રિધા પ્રોક્તા જહત્યજહતી તથા ।
વાચ્યૈકભાગત્યાગેન ભાગાન્તરપરિગ્રહઃ ॥ ૩૬॥

પરીક્ષકાઃ પ્રાહુરિત્થં ભાગત્યાગાખ્યલક્ષણામ્ ।
ગઙ્ગાયાં ઘોષ ઇત્યત્ર યા જહલ્લક્ષણા તુ સા ॥ ૩૭॥

શ્વેતો ધાવતિ યાન્ત્યેતે છત્રિણોઽચ્છત્રિણસ્તથા ।
અજહલ્લક્ષણા તત્ર વાચ્યાર્થસ્યાપિ સઙ્ગ્રહાત્ ॥ ૩૮॥

વિરુદ્ધાંશપરિત્યાગાદવિરુદ્ધાંશસઙ્ગ્રહાત્ ।

સોઽહમિત્યાદિવાક્યેષુ સા ભાગત્યાગલક્ષણા ॥ ૩૯॥

વ્યઞ્જના લક્ષણેત્યાહુર્લક્ષણા ગૌણ્યપિ ક્વચિત્ ।
અગ્નિર્માણવકોઽધીતે સિંહોઽયં ક્ષત્રિયસ્ત્વિતિ ॥ ૪૦॥

ગચ્છ કાન્ત ગમિષ્યામિ યત્ર જન્મ ભવિષ્યતિ ।
લોકે તવાહમિત્યત્ર નિવૃત્તિર્વ્યજ્યતે ગતેઃ ॥ ૪૧॥

દૃષ્ટં શ્રુતં વા પીનત્વં ન સમ્ભવતિ ભોજનાત્ ।
ઋતે રાત્રૌ વિશેષેણ ભોજનં પરિકલ્પ્યતે ॥ ૪૨॥

રાત્રિભોજનવિજ્ઞાનમર્થાપત્તિફલં ભવેત્ ।
અન્યથાનુપપત્તેસ્તુ જ્ઞાનં તત્કરણં મતમ્ ॥ ૪૩॥

ઉપલબ્ધેરભાવોઽપિ પ્રમાણાન્તરમિષ્યતે ।
અભાવગ્રહણાયેતિ સાધયન્તીહ કેચન ॥ ૪૪॥

એવં સર્વપ્રમાણાનાં વિષયાસ્તુ પૃથક્પૃથક્ ।
વ્યવહારબલાત્કલ્પ્યાસ્તસ્માત્તે વ્યાવહારિકાઃ ॥ ૪૫॥

॥ ઇતિ શ્રીમત્સ્વયમ્પ્રકાશસરસ્વતીચરણારવિન્દ-
સંલગ્નરજોભૂતાચ્યુતકૃષ્ણાનન્દતીર્થકૃતા માનમાલા સમાપ્તા ॥

Manamala is a text on the topic of epistemology /pramANa composed by Achyuta Krishnananda Tirtha. The પ્રમાણ (Proof) or means of knowledge are six in number: પ્રત્યક્ષ (Perception), અનુમાન (Inference), શબ્દ (Verbal Testimony), ઉપમાન (Comparison or Analogy), અર્થપત્તિ (Presumption or Postulation), and અનુપલબ્ધિ (Non-Perception).

Encoded and proofread by Harihara advaitapurna at gmail.com

*Manamala by Achyuta Krishnananda Tirtha*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*